# वैयाकरणसिद्धान्तकौमुदीस्थं
# कारक-प्रकरणम्

**प्रस्तोत्री - डॉ. लक्ष्मी शर्मा**

( गौविन्दं संस्कृतसदः )

# अनभिहिते

- इदम् अधिकारसूत्रम्।
- अनभिहिते = अनुक्ते इति तात्पर्यम्।
- न अभिहितम्= अनभिहितम्, तस्मिन्- अनभिहिते।
- यस्मिन् अर्थे प्रत्ययो विहितः, स उक्तो भवति।
- प्रायः कारकाधारित-विभक्तिविधायकेषु सर्वेषु सूत्रेषु अस्याधिकारो भवति। तद्यथा-
- अनुक्ते कर्मणि द्वितीया - कर्मणि द्वितीया
- अनुक्ते कर्तरि करणे च तृतीया- कर्तृकरणयोस्तृतीया
- अनभिहिते सम्प्रदाने चतुर्थी - चतुर्थी सम्प्रदाने
- अनभिहिते अपादाने पञ्चमी- अपादाने पञ्चमी
- अनभिहिते अधिकरणे सप्तमी- सप्तम्यधिकरणे च

# अनुक्ते कर्मणि द्वितीया

कर्मणि द्वितीयाविधायकं सूत्रमस्ति–

**कर्मणि द्वितीया**

**अनभिहिते कर्मणि द्वितीया स्यात्।**

देवदत्तः हरिं भजति।
माता भोजनं पचति।

**अभिहिते तु कर्मणि प्रातिपदिकार्थ–मात्रे प्रथमैव।**

यथा–

1. मया **हरिः** सेव्यते।
– लकारेण कर्म उक्तम्।
2. लक्ष्म्या **सेवितो हरिः।**
–क्तप्रत्ययेन कर्म उक्तम्।

# अभिधानं तु प्रायेण तिङ्-कृत्-तद्धित-समासैः

**तिङ्कृत्तद्धितसमासैः परिसंख्यानम्** – इति भाष्योक्त्याधारेण।

**तिङः = लकाराः** – मया पुस्तकं पठ्यते।

**कृत्-प्रत्ययाः** – मया ग्रन्थः अधीतः।

**तद्धिताः** – शतेन क्रीतः शत्यः।

(तेन क्रीतम् इत्यर्थे 'शताच्च ठन्यतावशते इति यत्-प्रत्ययेन कर्तृनिष्ठव्यापारप्रयोज्यफलाश्रयरूपं कर्म उक्तम्)

**समासाः** – प्राप्त आनन्दो यं प्राप्तानन्दः = आनन्दकर्तृकप्राप्तिकर्मीभूतः।

प्राप्तः आनन्दः येन, प्राप्तः आनन्दः यम्

('प्राप्तः' इति कर्तरि क्तः 'गत्यर्थाकर्मक०' इति सूत्रेण। अन्यपदार्थो हि कर्तृनिष्ठव्यापारप्रयोज्यफलाश्रयरूपं कर्म, तच्च उक्तं समासेन।

**क्वचिन्निपातेनाभिधानम्**– विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुम् असाम्प्रतम्।

असाम्प्रतम् = न युज्यते, एतेन कर्मण अभिधानम्।

अभिहितसम्प्रदानस्य उदाहरणम्-

दानीयः विप्रः

अस्य विग्रहवाक्यम्- दीयते अस्मै, सः

# अनीप्सितं कर्म

अनीप्सितयोः = द्वेष्य-उपेक्ष्ययोः

कर्मसंज्ञाविधायकं सूत्रम्-

**तथायुक्तं चानीप्सितम्**

ईप्सिततमवत्-क्रियया युक्तम् अनीप्सितम् अपि कारकं कर्मसंज्ञं भवति

1. **ओदनं** भुञ्जानो **विषं** भुङ्क्ते।
2. **ग्रामं** गच्छन् **तृणं** स्पृशति।

# अनीप्सितं कर्म

संज्ञान्तरैः अविवक्षितानां कर्मसंज्ञाविधायकं सूत्रम्-

**अकथितं च**

अपादानादिविशेषैः अविवक्षितं कारकं कर्म स्यात्

**दुह्याच्पच्दण्डरुधिप्रच्छि-चिब्रूशासुजिमथ्मुषाम्।**
**कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम्॥**

दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद् युज्यते तदेव अकथितं कर्म- इति तात्पर्यम्।

1. गां दोग्धि पयः - अकथितं च

गोः दोग्धि पयः - अपादानत्वेन विवक्षा।

2. वामनः बलिं याचते वसुधाम् - अकथितं च

वामनः बलेः याचते वसुधाम्- अपादानत्वेन

3. तण्डुलान् ओदनं पचति- अकथितं च

तण्डुलेभ्यः ओदनं पचति- अपादानत्वेन..

4. गर्गाञ्छतं दण्डयति- अकथितं च

गर्गेभ्यः शतं दण्डयति- अपादानत्वेन..

5. व्रजम् अवरुणद्धि गाम्- अकथितं च

व्रजे अवरुणद्धि गाम्- अधिकरणत्वेन..

6. माणवकं पन्थानं पृच्छति- अकथितं च

माणवकात् पन्थानं पृच्छति- अपादानत्वेन

7. वृक्षम् अवचिनोति फलानि- अकथितं च

वृक्षाद् अवचिनोति फलानि- अपादानत्वेन...

8. माणवकं धर्मं ब्रूते, शास्ति वा-     अकथितं च

माणवकाय धर्मं ब्रूते शास्ति वा

9. यज्ञदत्तः शतं जयति देवदत्तम्- अकथितं च

यज्ञदत्तः शतं जयति देवदत्तात्- अपादानत्वेन

10. सुधां क्षीरनिधिं मथ्नन्ति- अकथितं च

सुधां क्षीरनिधेः मथ्नन्ति- अपादानत्वेन

11. देवदत्तं शतं मुष्णाति- अकथितं च

देवदत्ताच्छतं मुष्णाति- अपादानत्वेन

12. ग्रामम् अजां नयति, हरति, कर्षति, वहति वा।

- अकथितं च

ग्रामाद् अजां नयति, हरति, कर्षति, वहति वा।